# ॥ श्रीबालामन्त्रमातृकास्तवः ॥

श्रीमद्भिनवस्वयंप्रकाश रामानन्दसरस्वतीस्वामिभिः विरचितः

ऐन्द्रं स्थानमपि स्वसेवकजनाभीष्टस्य संपूर्तये
यत्र क्वापि सकृत्स्मृताऽपि वितरेद्या भक्तवात्सल्यतः।
कल्याणीं कलिकल्मषप्रशमनीं कैवल्यदां तामहम्
श्रीबालां त्रिपुराम्बिकां भगवतीं भक्त्या भजाम्यन्वहम् ॥१ ॥

क्लींकारीति सदा बुधैर्निगदितां देवाधिदेवैः स्तुताम्
सोमास्यां सुरसुन्दरीजननतां सौभाग्यसंपत्करीम्।
ब्रह्मोपेन्द्रसुरेन्द्रवन्दितपदां सौन्दर्यपाथोनिधिम्
श्रीबालां त्रिपुराम्बिकां भगवतीं भक्त्या भजाम्यन्वहम् ॥२ ॥

सौख्यं साधुजनस्य दातुमनिशं या सर्वसंनाहिनी
यां चण्डादिविपक्षशिक्षणकलादक्षां समाचक्षते।
नीरक्षीरतुषारहारधवलप्रस्निग्धमन्दस्मिताम्
श्रीबालां त्रिपुराम्बिकां भगवतीं भक्त्या भजाम्यन्वहम् ॥३ ॥

सौभाग्यं वितनोतु विश्वजननी विश्वेश्वरप्रेयसी
वाल्मीक्यादिमुनीश्वरैरनुदिनं संसेविता सादरम् ।
संसाराख्यसमुद्रमध्यकुहरान्मामुद्धरत्वञ्जसा
श्रीबालां त्रिपुराम्बिकां भगवतीं भक्त्या भजाम्यन्वहम् ॥४ ॥

क्लींकाराभिधमन्त्रराजनिलयां क्लेशौघविध्वंसिनीम्
कैवल्यान्तसमस्तसाधुपदवीविश्राणनैकव्रताम् ।
कारुण्यामृतवर्षिलोचनयुगां कल्हारमध्यस्थिताम्
श्रीबालां त्रिपुराम्बिकां भगवतीं भक्त्या भजाम्यन्वहम् ॥५ ॥

ऐंकाराभिधमातृकोदरलसद्विद्युत्प्रभावल्लरीम्
बालार्कारुणदेहकान्तिनिवहैर्देदीपिताशान्तराम् ।
राकाचन्द्रसमानरम्यवदनां शोकापहन्त्रीं सताम्
श्रीबालां त्रिपुराम्बिकां भगवतीं भक्त्या भजाम्यन्वहम् ॥६ ॥

जगदम्बापदाम्भोजषट्पदीकृतमानसः ।
इमां तु षट्पदीमालां कण्ठे कुरुत सादरम् ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]